Subject- Sanskrit

SEM- 4 (Programme)

Course Code- APSNS 401C-1D

Course Title- Rājdharma & Brahmatatwṃ

**Course Topic- Manusaṃhitā 7th Chapter Manvarthamuktāvalī**

**त्रैविद्येभ्यस्त्रयीं विद्याद् दण्डनीतिञ्च शाश्वतीम्।**

**आन्वीक्षिकीञ्चात्मविद्यां वार्तारम्भांश्च लोकतः।।7/43।।**

विनयविरहिता राजानो विनाशमाप्नुवन्ति, विनयिनश्च समृद्धिं लभन्ते इत्युक्तं पूर्वमेव। अतो विविधेभ्यो विद्वद्भ्यो राज्ञा विविधेषु विषयेषु शिक्षा ग्रहणीया। ऋक्सामयजुषां वेदानां समाहारस्त्रयी-शव्देनोच्यते। अस्मिन् वेदत्रितये निष्णातेभ्यो जनेभ्यो ब्रह्मचर्याश्रमे राजा त्रयीमभ्यस्येत्। दण्डनीति-र्नामार्थशास्त्रम्। अलब्धविषयाणां लाभोपायस्तथा लब्धविषयाणां र7पायः शास्त्रेऽस्मिन् समुपदिष्टः। अन्वीक्षिकीशव्देन तर्कविद्या वोध्यते। सांख्य-योग-लोकायत शास्त्राण्यपि आन्वीक्षिकीविद्यायामेव अन्तर्भावितानि। अत उपलक्षणेन सर्वण्येव दर्शनशास्त्राणि आन्वीक्षिकी-पदवाच्यानि भवन्तीति मन्यते। आत्मविद्याशव्देन उपनिषत्-प्रतिपादित-ब्रह्मविद्यैव वोध्या। कृषि-पशुपालना-वाणिज्यादि-विषयकं शास्त्रं तावद् वार्तेत्युच्यते। एतासु विद्यासु ये खलु पारङ्गतास्तेभ्यो राज्ञा शास्त्राण्येतानि शिक्षणीयानि। एवं वेदत्रितयं दण्डनीतिरान्वीक्षिकी आत्मविद्या वार्ता चेति विषयेषु नृपतेर्ज्ञानमपरिहार्यमिति विषयसारः।